CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkata



भावेन सह्येत, फलतया देहात्मवादी समुदायः स्वस्थितिपरिवर्तने स्वतन्त्रतया प्रवर्तितुं शक्नोति, तथा प्रवर्तमानश्च न्यायपूर्णां परस्परहितावहां सामाजिकीमार्थिकीं शासनिकीं च व्यवस्थां सम्पाद्य सुन्दरतरं विश्वं निर्मातुं प्रभवति।

देहात्मवादे स्वसुखस्यैव सर्वैः काम्यतया, मरणोत्तरं च स्वकर्मणामुत्तरदायित्वस्याभावेन निःशङ्कीभूय मनुष्यः स्वसुखार्थमेव प्रवर्तेत, परार्थं च न चेष्टेत, परोत्पीडनेनैव यदि स्वाभ्युदयः साध्यः, तदा ततोऽपि न विरमेत्, इत्यपि नाशङ्कनीयम् लोकहिताय सोढक्लेशानां मृतपुंसां लोके जायमानायाः सम्मानचर्चाया इतिहासग्रन्थेषु तेषां सबहुमानमुल्लेखस्य च दर्शनेन स्वसुखाभिलाषशिथिलीकरणपूर्वकलोकहितावहकर्मसु प्रवृत्तिसम्भवेनोक्तदुष्प्रवृत्त्यभिवृद्धिभयस्य निरवकाशत्वात्।

देहात्मवादेऽपरोऽप्येको गुणोऽयमस्ति यन्मनुष्योऽनैतिकं कदाचारकलुषितं स्वार्थप्रधानं जीवनं यापयतां जनानां लोकनिन्दां वीक्ष्य मरणोत्तरं त्रुटिपरिहारस्यावसराभावेन वर्तमानदेहपातात्पूर्वमेवात्मनो जीवनं नैतिकं निर्दोषं च यापयितुं सचेष्टो भवितुमर्हति, अतिरिक्तात्मवादे च भाविनि जन्मनि वर्तमानजीवनस्य त्रुटीनां परिहारस्यावसरप्राप्तिसम्भावनया वर्तमानं जीवनं सांसारिकसुखोपभोगेन नेतुकामस्तादृशसुखार्थमपेक्षितायाः समृद्धेः सम्पादनाय अन्यायपूर्णे कर्मण्यपि प्रवर्तितुमर्हति, तदेवं देहात्मवादे जीवने नैतिकताप्रतिष्ठापनस्याधिकतरं सम्भाव्यमानतया एष वाद एव लोकमङ्गलायोपादेयतां धत्ते इत्यतीव सुस्पष्टम्।

• • •

(67)

# महाभाष्ये देवदत्तस्य जीवनवृत्तम्

'पद्मविभूषणः' आचार्यप्रवरश्रीबलदेव उपाध्यायः
अनुसन्धानसंस्थाननिदेशकचरः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी।

❀ ❀ ❀

संस्कृतवाङ्मये व्याकरणशास्त्रस्योद्भावकाः प्रचारकाश्च त्रयो मुनयः सुप्रसिद्धाः सन्ति—पाणिनि-कात्यायन-पतञ्जलयश्च। प्रामाण्यदृष्ट्या पाणिनेरधिकं प्रामाण्यमस्ति कात्यायनस्य, कात्यायनाच्चाधिकं प्रामाण्यमस्ति पतञ्जलेः। सूक्तिरियमत्र सुप्रसिद्धाऽस्ति—'यथोत्तरं मुनीनां प्रामाण्यम्'। महर्षिणा पतञ्जलिना व्याकरणस्य सिद्धान्तानामवबोधाय स्वग्रन्थे स्थाने-स्थाने उदाहरणाय 'देवदत्त' नामकस्य जनस्य कल्पना कृताऽस्ति, तैर्देवदत्तस्य जीवनवृत्तस्य इयन्मनोरमं विवरणं प्रस्तुतीकृतमस्ति, यद्वयं तस्य समग्रां रूपरेखां पाठकानामग्रतः कर्षयितुं शक्नुमः।

महर्षिणा भगवता पतञ्जलिना देवदत्तस्य विषये यानि विभिन्नानि तथ्यानि प्रदर्शितानि सन्ति, तानि सर्वाणि तथ्यानि सामूहिकरूपेण एकत्रीकृत्य समग्रजीवनस्य चित्रमत्र प्रस्तूयते।

अत्रायमभिप्रायः—जीवनस्य प्रत्येकस्य तथ्यस्य ज्ञानाय महाभाष्यादेव विभिन्नानि वाक्यान्यत्रोपस्थाप्यन्ते।

**(१) देवदत्तो बालकरूपे—**

देवदत्तस्य कुटुम्बः स्रुघ्नादागत आसीत्—'स्रुघ्नो देवदत्तः[1]' इति।

देवदत्तो गर्गगोत्रस्यासीत्—'गार्ग्यो देवदत्तः[2]'।

देवदत्तोऽनेकैर्नामभिराह्वयते स्म। देवदत्तः, देवकः, दत्तकः, देवदत्तकः, दत्तश्चेत्येतानि तदाह्वानस्य नामान्यासन् 'देवदत्तको देवकः। देवदत्तको दत्तकः। देवदत्तो दत्तः[3]' इति।

पितृभ्यां देवदिन्नमिति तन्नामकरणं कृतमासीत्, परञ्च गुरुणाऽध्यापनसमये आश्रमे समागते प्राकृतनाम्नः परिष्कारत्वेन संस्कृतीकरणं कृत्वा 'देवदत्त' इति नामकरणं कृतम्। एतस्मिन् नाम्नि धृते तत्प्राचीनं नाम निवृत्तमभूत्। सर्वे जनास्तं परिष्कृतेन तन्नाम्ना आह्वयाञ्चक्रुः—'देवदत्तशब्दो देवदिण्णशब्दं निवर्तयति[4]' इति।

१. महाभाष्ये—४।३ २५; २. तत्रैव—४।१।९३; ३. तत्रैव—५।३।८३; ४. तत्रैव—१।३।१।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta



देवदत्तः कदाचित् शिखां धारयति स्म, कदाचिज्जटाधारणं करोति स्म। कदाचिच्च मः मुण्डितकेशो भवति स्म; परञ्च प्रत्येकस्यां दशायां तं जनाः 'देवदत्त' नाम्नैवाह्वयति स्म—'देवदत्तः मुण्डश्चि, जटश्चि, शिख्यपि स्वाम् आख्यां न जहाति[1]' इति।

देवदत्तः केनापि ताडितेन विनापि निरर्थकमेव क्रोशति, कोलाहलञ्च करोति स्म—'अनाहतो नदति देवदत्तः[2]' इति।

भोजने देवदत्ताय दत्तो मोदकोऽतिप्रिय आसीत्। मोदको भृष्टं तण्डुलं पिष्ट्वा गुडेन च संयोज्य 'मिष्टम' इति निर्मीयते स्म, इदमेव मोदकस्य ( लड्डूकस्य ) 'मिष्टम्' देवदत्तायातिरोचते स्म —'अभिप्रायो देवदत्तस्य मोकदेषु भोजने '।

देवदत्तः स्वमातरं प्रति अत्यादरशील आसीत्, सम्मानं करोति स्म—'साधुर्देवदत्तो मातरं प्रति[3]' इति।

(२) देवदत्तः पाठशालायाम्—

देवदत्तो विद्यां पठति 'पठ्यते विद्या देवदत्तेन[4]'।

अयं बालको योऽध्ययने रतोऽस्ति, देवदत्तोऽस्ति -'योऽधीयान आस्ते, स देवदत्तः[5]' इति।

देवदत्तः, तन्मित्रं यज्ञदत्तश्च द्वावपि धनिकौ स्तः, सुन्दरौ दर्शनीयौ सत्कुलोत्पन्नौ च स्तः। परञ्चोभयोर्वेदाध्ययने देवदत्तो यज्ञदत्तापेक्षया अधिको योग्यो वर्तते-'देवदत्तयज्ञदत्तौ आढ्यौ अभिरूपौ दर्शनीयौ पक्षवन्तौ। देवदत्तस्तु यज्ञदत्तात् स्वाध्यायेन विशिष्टः[6]'।

(३) देवदत्त कृषकरूपे—

देवदत्तस्य जीवनसाधनं कृषिरासीत्। तद्बलेनैवास्य जीविका सञ्चाल्यमाना आसीत्। देवदत्तस्य क्षेत्राणि नद्यास्तटं यावत् प्रसृतान्यासन्—'नद्यन्तं देवदत्तस्य क्षेत्रम्[7]' इति।

देवदत्तेन क्षेत्रमिदं स्वेनैव हस्तेन क्रीतम्। तेन क्षेत्रमिदं स्वार्जितेन वित्तेन क्रीतम्। सः परिश्रमी कृषक आसीत्, यो भोजन-पानाद्यतिरिक्तमन्नमुत्पादयति स्म, तदन्नमेव विक्रीय तेन क्षेत्रं क्रीतम्—'देवदत्तेन पाणिना क्रीतम् ' इति।

देवदत्तः, तन्मित्राणि च पारस्परिकसद्भावेन धान्यं लुनन्ति स्म। तेष्वेकोऽन्यस्यास्मिन् कार्ये सहायतां कुर्वन्ति स्म। देवदत्तस्य धान्यं व्यतिलुनन्ति[10]'।

१. महाभाष्ये—१।१।१; २. तत्रैव—६।२ १४८; ३. तत्रैव—५।१।११६।
४. तत्रैव—२।३।८; ५. तत्रैव—३।१।६७; ६. तत्रैव—३।२।१२६।
७. तत्रैव—२।१।६०; ८. तत्रैव—७।२।९१; ९. तत्रैव।
१०. तत्रैव।



क्षेत्रे देवदत्तः स्वहस्ते दात्रमादाय समन्तत एकस्मिन्नेव समये चङ्क्रमणं कुर्वन् दृश्यते, येन ज्ञायते यद् मध्येजलं प्ररूढधान्यं स्वत एव छिन्नम्। देवदत्तः क्षेत्रे इतस्ततो दात्रेण धान्यं इयता वेगेन लुनाति यद् दर्शकैर्ज्ञायते (यत्) क्षेत्रं स्वयमेव लूयते—'लूयते केदारः स्वयमेवेति यत्रासौ देवदत्तो दात्रहस्तः समन्ततो विपरिपतन् दृश्यते[1]'।

देवदत्तोऽतिस्वादुङ्कृत्य प्रमोदेन यवानां कृशरां ( यवागूविरलद्रवा ) भुङ्क्ते। तद्यथा—'स्वादुङ्कारं यावागूं भुङ्क्ते देवदत्तः[2]'।

देवदत्तः स्वप्रयोजनाय कटं (तृणनिर्मितम्) कारयति। कटमेवोत्यानोपवेशन-शयनपार्श्वपरिवर्तनानां प्रधानमुपकरणमस्ति। फलतः कटं स्वोपयोगाय (व्यवहाराय) अन्येन कारयति—'कारयति कटं देवदत्तः[3] इति।

कटकस्तृणादिभिर्निर्मीयते स्म। द्वारदेशस्य पिधानायापि तदुपयोग आसीत्। सः स्वयं स्वहस्ताभ्यां कटकं जवनिकार्थमुच्छ्रयति —'उच्छ्रयति कटं देवदत्तः[4]'।

स्वहस्ताभ्यामेव देवदत्तेन कटः सुसम्पादितः—'प्रकृतः कटं देवदत्तः[5]'।

( ४ ) देवदत्तस्य वैवाहिकं जीवनम्—

देवदत्तो यज्ञदत्तामतिसुन्दरीं कन्यां मन्यते 'दर्शनीयां मन्यते देवदत्तो यज्ञदत्ताम्[6]'।

देवदत्तेन कन्या आलिंगिता। इयं कन्या तस्य वधूः (कन्या=वधूरिति कोशकारः)—'उपाश्लेषि कन्या देवदत्तेन[7]'।

देवदत्तः पुत्रवान् बभूव। तमादाय देवदत्तस्य जनकः (बालकस्य पितामहः) स्वक्रोडे स्थापयति स्म। एकदा केनापि पितामहस्याङ्के स्थितं बालकं दृष्ट्वा पृष्टम्—कस्यायं बालकः ? पितामहेनोत्तरितम्—अयं देवदत्तस्य बालकः। पितामहस्योत्सङ्गे दारकमासीनं दृष्ट्वा कश्चित् पृच्छति कस्यायमिति ? स आह—'देवदत्तस्य'।

देवदत्तस्य पुत्रः शैत्यर्तौ—शीतदिवसेषु स्वहस्ते कम्बलमादाय चलति स्म। 'देवदत्तस्य पुत्रः पाणिकम्बलः[8]' इति।

(५) पाटलिपुत्रनगरस्य प्रशंसा—

देवदत्तः पाटलिपुत्रस्य निवासी आसीत्। फलतः पाटलिपुत्रस्य समृद्धेः प्रसाधनस्य च विषये औत्सुक्यं जनसाधारणाय स्वाभाविकमस्ति। अनेन प्रकारेण कश्चिदेकः प्रवासी जनो देवदत्तस्यावासनगराय पाटलिपुत्राय स्वप्रशंसा विदधाति—'पाटलिपुत्रस्य व्याख्यात्री सुकौशला " ईदृशा अस्य प्राकाराः[9]'।

१. महाभाष्ये—३।१।८७; २. तत्रैव—३।४।२६; ३. तत्रैव—३।१।४८।
४. तत्रैव—३।१।४८; ५. तत्रैव—३।१।८७; ६. तत्रैव।
७. तत्रैव—३।१।४६; ८. तत्रैव ।१।४८; ९. तत्रैव।

Center for Shaiva Studies, Pondicherry Collection

Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta



अत्रायमाशयः—सुकौशला नाम्नी काचित् पुस्तिका पाटलिपुत्रस्य प्रशंसां अतिस्फुटशब्दैः करोति। पाटलिपुत्रस्य प्राकारभित्तय ईदृशा आसन् इति विज्ञापयति।

पाटलिपुत्रस्य भौगोलिकी स्थितिविषयेऽत्र कथितमस्ति। पाटलिपुत्रनगरं शोणनदस्य तटे विस्तृतं विद्यमानमस्ति—'अनुशोणं पाटलिपुत्रम्'[1]।

अत्र पाटलिपुत्रस्य प्रासादानां नगरप्राकारभित्तीनाञ्च वैशिष्ट्यमभिलक्ष्य तेषामाश्चर्यजनकतायाः संकेतोऽस्ति। पाटलिपुत्रस्य प्रासादा उच्चाति उच्चाः सन्ति (अत्युच्चाः,। ता नगरभित्तयो या अभितः परिवेष्टयन्ति। 'पाटलिपुत्रस्य प्रासादाः। पाटलिपुत्रस्य प्राकाराः'[2]।

पाटलिपुत्रनगरमेव न महत्, तस्य भित्तयोऽप्युच्चतमाः सन्ति, प्रत्युत तत्रत्य-निवासिनोऽपि सभ्याः शिष्टाश्च सन्ति। पतञ्जलेः काले एकं प्रसिद्धं नगरमासीत् सांकाश्यम्, यद्धि स्वनगरवासिनां रूपसम्पत्तिविषये सुप्रसिद्धमासीत्। परञ्चोभयो-स्तारतम्ये तुलनायां च पाटलिपुत्रनिवासिनो दर्शने सांकाश्यनिवासिनामपेक्षया अतीव शोभाधायका आसन् –'सांकाश्यकेभ्यः अभिरूपतराः पाटलिपुत्रकाः'[3]।

(६) देवदत्तो रोगशय्यायाम्—

देवदत्तो ज्वरेण पीडितोऽस्ति। ज्वरस्य कारणमिदमस्ति यत् तेन दध्ना सह कर्कटिका भक्षिता। वैद्यानां कथनं प्रामाणिकं विराजते यद् दध्ना सह कर्कटिका-भक्षणं प्रत्यक्षज्वर एवास्ति। किमेतादृशेन भोजनेन कोऽपि रोगरहितो भवेत्? 'दधित्रपुसं प्रत्यक्षो ज्वरः'[4]।

रोगशय्याग्रस्ताय देवदत्ताय किमपि वस्तु न रोचते। तेन उपवासो विहितः। फलतो बुभुक्षिताय जनाय किमपि वस्तु न रोचते। 'न देवदत्तं प्रतिभाति किञ्चित्। बुभुक्षितं न प्रतिभाति किञ्चित्'[5]।

देवदत्तस्य रुग्णावस्थायां कोऽपि तद्विषये पृच्छति यद् देवदत्तस्य रोगः कीदृशः? एकेन कथितं रोगः शमनं याति। अधुना तस्य रोगः शमं याति। अन्यः कश्चित् कथयति—नहि नहि, रोगः पूर्ववदेवास्ति। देवदत्तः रोगशय्यायामेव वर्तते—'एवं हि कश्चित् पृच्छति –किमवस्थो देवदत्तस्य व्याधिरिति, अपर आह – अपक्षीयत इति। अपर आह स्थित इति'[6]।

देवदत्तोऽधुना पिण्डीं भक्षयति। पिण्डी औषधस्य गुटिका भवितुमर्हति, अथवा भोजनस्य पिण्डी भविष्यति। आरोग्याय स इमां गुटिकामेव खादति—'भक्षयति पिण्डीं देवदत्तः'[7] इति।

१. तत्रैव—२।१।१५; २. तत्रैव—४।३।१३३; ३. महाभाष्ये – ५।३।५७।
४. तत्रैव; ५. तत्रैव—२।३।२; ६. तत्रैव।
७. तत्रैव।



(७) ग्रामात् पाटलिपुत्रनगरस्थब्राह्मणानां निमन्त्रणम्—

कश्चिद् उक्तो ग्रामे भिक्षां चर, देवदत्तं चानयेति। ग्रामस्य निवासिनं केनापि कथितम्—'ग्रामे भिक्षाम् अट, नगरे च गत्वा देवदत्तमानय'[1]।

ग्राम्यो जनोऽपृच्छद् यत् पाटलिपुत्रे गत्वा अहं ब्राह्मणं कथं ज्ञास्यामि। देवदत्तस्तु ब्राह्मण आसीत्। अतस्तद्ज्ञानाय कानि साधनानि सन्ति, येनाहं ब्राह्मणं ज्ञातुं शक्नुयाम्। अस्मिन् विषये आदेशदाता जनस्तं ब्राह्मण-अब्राह्मणयोः पार्थक्यं सङ्केतयति प्रकटयति—'अब्राह्मणोऽयं यस्तिष्ठन् मूत्रयति। अब्राह्मणोऽयं यो गच्छन् भक्षयति। गौरं शुच्याचारं पिङ्गलं कपिलकेशं दृष्ट्वाऽध्यवस्यति ब्राह्मणोऽयमिति। ततः पश्चाद् उपलभते नायं ब्राह्मणोऽब्राह्मणोऽयमिति'[2]।

अब्राह्मणः स भवति, य उत्थाय मूत्रयति=मूत्रं करोति। अब्राह्मणश्च स भवति, यो गच्छन् धावन् वा खादति। एतत्तु ब्राह्मणातिरिक्तस्य जनस्य परिज्ञानं भवति। यदा कोऽपि कमपि जनं पश्यति यो गौरवर्णः स्यात्, पवित्राचरणशीलः, कपिशवर्णदेहचर्मयुक्तः, कपिलवर्णकेशः स्यात्, तदा तं विजानीयाद् यद् एतादृशो जनो निश्चयेन ब्राह्मणो भवति। तदनन्तरं यस्य देहयष्टिस्तथाचारोऽस्माद् वर्णाद् पृथग्भवेत्, तदा विजानीयाद् यत् स ब्राह्मणो नास्ति; प्रत्युत 'अब्राह्मणः' एवास्ति।

सत्यम्, साधु, इदन्तु ब्राह्मणाब्राह्मणयोः पार्थक्यमस्ति। अधुना देवदत्तस्य परिचयो मां कथं प्राप्स्यति। तं विज्ञापयति कश्चित्—पाटलिपुत्रं गत्वा तत्रत्यनिवासि-सकाशात् परिचयः प्राप्तव्यः। नास्ति सः साधारणो जनः। फलतः स ग्रामीणः पाटलिपुत्रे गत्वा देवदत्तस्य परिचयं पृच्छति—देवदत्तं मे भवान् उपदिशतु'[3] इति।

महाशय! कृपां विधाय मह्यं देवदत्तस्य परिचयं ददातु, तस्य निमन्त्रणाय ग्रामादत्रागतोऽस्मि। तदा पाटलिपुत्रवासी जनो देवदत्तस्य परिचये तद्देहसम्पदो वर्णनं करोति।

अस्मिन्नेव नगरे देवदत्तस्य निवासः। सः स्वभुजयोः केयूरे (अद्यत्वे विजायठ इति नाम्ना प्रसिद्धः), कर्णयोः कुण्डले, शिरसि च किरीटं धारयति। तस्य वक्षःस्थलं विस्तीर्णम्, भुजौ मांसलौ वर्तुलौ च। नेत्रयोः रक्तिमा दृश्यते। तस्य नासिका तीक्ष्णा, सुन्दरवेषभूषया च सम्पन्नोऽस्ति। एतादृशो व्यक्तित्वमण्डितः पुरुषो देह-सम्पत्त्या युक्तः साजसज्जया सुशोभितो जनो देवदत्तो वर्तते। एतादृशगुणसम्पन्नस्य जनस्य परिज्ञाने विलम्बो न भविता—'स गृहस्थः पाटलिपुत्रस्थं देवदत्तमुद्दिशति। अङ्गदी, कुण्डली, किरीटी, व्यूढोरस्को, वृत्तबाहुः, लोहिताक्षः, तुङ्गनासो विचित्राऽऽभरण ईदृशो देवदत्त इति'[4]।

इत्येव नहि, देवदत्तस्य स्वप्रासादोऽपि वर्तते, यस्मिन् स निवसति—'प्रासादो देवदत्तस्य स्यात्'[5]।

१. तत्रैव; २. तत्रैव—२।२।६; ३. तत्रैव—१।३।२।
४. तत्रैव—१।३।२; ५. तत्रैव—५।१।१६।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta



फलतो देवदत्तः सम्पत्तिशक्तियुतो धनाढ्यो जनोऽस्ति। तस्य पार्श्वे गावः सन्ति, घोटकाः सन्ति, स्वर्णराशिरस्ति। सः सम्पन्नो जनो वर्तते। तस्य अभिज्ञान-साधनमपरमप्यस्ति यत् स विधवापुत्रोऽस्ति। तत्पितुर्निधनमभूत्—'देवदत्तस्य गावोऽश्वा हिरण्यं च आढ्यो वैधवेयः'[1]।

गच्छ, एभिर्गुणैर्युक्ताय ब्राह्मणाय देवदत्ताय अत्र ग्रामे भोजनाय निमन्त्रणं देहि—'आमन्त्रयस्व एनम्'[2]।

एतानि वचनानि श्रुत्वा तथा देवदत्तस्य तथोक्तलक्षणेन रूपेणाच्छादनेन पूर्णतया परिचयं प्राप्य स नगरे गच्छति, यत्र देवदत्तेन सम्मेलनं भवति। सः पृच्छति, किं भो भ्रातः! त्वमेव देवदत्तोऽसि। देवदत्त उत्तरयति—ओम्, ओम्, अहमेव देवदत्तोऽस्मि—'देवदत्तोऽहं भोः'[1]।

अस्मिन् प्रसङ्गे स सन्देशवाहकः कथयति यत्—आयुष्मन् देवदत्त! भवानेव देवदत्तः! कथ्यतां देवदत्त! अपि कुशली भवान्। चलतु भवान्! (भगवन्!) मम ग्रामे चलतु। तत्र ओदनभक्षणाय भवान् निमन्त्रितः। तत्र अवश्यमेव गन्तव्यम्—'आयुष्मान् एधि देवदत्त भोः। देवदत्त भोः। देवदत्त कुशली असि। आगच्छ देवदत्त। ग्रामम् ओदनं भोक्ष्यसे'[4]।

भगवन् देवदत्त! मां मार्गं निर्दिश। अहम् अन्यस्मिन् ग्रामे गन्तुमिच्छामि, तत्र केन पथा गमनं भवेत्, कृपां कुरु, मार्गं निर्दिश।

ग्रामान्तरं गमिष्यामि पन्थानं ने भवान् उपदिशतु। देवदत्तो मार्गं निर्दिशति, तत्र स्थाने गत्वा भवान् दक्षिणावर्तो भूत्वा तस्य चाग्रतोऽमुकस्थाने वामावर्तो भवतु। तदा अभीष्टग्रामं प्राप्स्यति—'स तस्मै आचक्षते—अस्मिन्नवकाशे हस्तदक्षिणो ग्रही-तव्योऽमुस्मिन् अवकाशे हस्तवाम इति'[5]।

धन्योऽसि भगवन्। भवता मम उचितो मार्गो निर्दिष्टः। अतःपरमहं तत्र प्राप्स्यामि—'उपदिष्टो मे पन्थाः'[6]।

भोजनस्य निमन्त्रणं प्राप्य देवदत्तस्तस्मिन् ग्रामे एकाकी न, प्रत्युत स्वपुत्रेण सह गच्छति। तदा मार्गे एकः पथिको योऽनेन वृत्तान्तेन परिचितोऽस्ति, तमभिलक्ष्य कथ-यति—पश्यतामिदं द्विदलोदनस्य निमन्त्रणे अयं सज्जनो गच्छति—'ओदनं भोजको व्रजति'[7]।

(८) देवदत्त आतिथेयस्य गृहे—

अवलोक्यतामेतत्—देवदत्तः स्वपुत्रेण सह आगच्छति—'पुत्रेण सहागतो देवदत्तः'[8]।

१. तत्रैव—५।३।६०; २. तत्रैव; ३. तत्रैव—८।२।८३। ४. तत्रैव—८।२।८३; ५. तत्रैव—१।३।२; ६. तत्रैव—१।३।२। ७. तत्रैव; ८. तत्रैव—२।३।१९।



तत्र कोऽप्यपरिचितो जनस्तं पृच्छति, यत् कथ्यतां भवान् कुतः समागतः? अपि कुशली भवान् वर्तते? 'कुतो भवान्? देवदत्त, कुशल्यसीति'[1]।'

देवदतः शीघ्रमुत्तरयति—अहं पाटलिपुत्रादागतोऽस्मि—'पाटलिपुत्रात्'[2]।'

आतिथेयो निमन्त्रितान् ब्राह्मणान् सहैव समागतान् दृष्ट्वा आश्चर्यचकितो भूत्वा कथनाय प्रवृत्तो भवति, भ्रातः! महदाश्चर्यमिदं यत्—इत ओदनस्य पाकोऽनेन निष्पन्नो नाभूत्, ततो ब्राह्मणानां सङ्कुलः सञ्जातः। उभे घटने एकदैव सम्पन्ने। इत ओदनपाकः सञ्जातः, अपरत्र समस्ता निमन्त्रिता जना उपस्थिता जाताः। आश्चर्य-मस्ति। महदाश्चर्यमेवास्ति—'आश्चर्यमिदं वृत्तम्। ओदनस्य च नाम पाको ब्राह्मणा-नाञ्च प्रादुर्भाव इति'[3]।

निमन्त्रितेषु जनेषु उभयविधा जना आसन्। केचन धनाढ्या आसन्, केचन च दरिद्रा आसन्। फलतो धनाढ्या जनाः प्राग्भोजनेन सत्कृताः। तावत्कालं दरिद्रा जनाः प्रतीक्षन्ते स्म। एतद् वस्तुतस्तथैवास्ति, यथा नौकया कस्या अपि नद्याः पारगमनस्य घटना भवति। धीवराः प्रथमं समाजे अभिनन्दनीयान् ब्राह्मणान् प्रथमतो नौकया पारं नयन्ति। तावत्कालपर्यन्तं निम्नश्रेणिजनाः पारगमनप्रतीक्षायामासते—'ऋद्धेषु भुञ्जानेषु दरिद्रा आसते। ब्राह्मणेषु तरत्सु वृषला आसते'[4] इति।

(९) भोजनस्य दृश्यम्—

आतिथेयः स्वसहयोगिवर्गान् आदिशति—अवलोकयतु भ्रातः। ब्राह्मणेभ्यो दधि दीयताम्, कौण्डिन्याय तक्रम्। अवशिष्टमस्ति यद् व्यञ्जनम्, तस्मिन् विषये तु कामपि चिन्तां मा कुरु; प्रत्युत एकतः सर्वेभ्यो जनेभ्यः स्वच्छन्दतया दीयताम्। समानं नटभार्यावत् (यस्याः सम्पर्कः सर्वैः सह स्वच्छन्दतया क्रियते)—'दधि ब्राह्मणेभ्यो दीयताम्, तक्रं कौण्डिन्यायेति व्यञ्जनानि पुनः नटभार्यावद् भवन्ति'[5]।'

देवदत्तो यज्ञदत्तो विष्णुमित्रश्चेति त्रयोऽपि सुहृदोऽत्रामन्त्रणे उपस्थिता वर्तन्ते। त्रयोऽपि समकालमेव भोज्यन्तामिति आदिशति निमन्त्रणकर्ता—'देवदत्त-यज्ञदत्त-विष्णुमित्रा भोज्यन्ताम्'[6] इति।

आतिथेयस्तत्पश्चात् कथयति—देवदत्त! अधुना दधि तिष्ठतु, इदानीं भवान् व्यञ्जनेन सह ओदनं भुङ्क्ष्व—'तिष्ठतु दधि, अशान त्वं शाकेन'[7]।

देवदत्त उच्चैर्वदति—न सूपे लवणम्, न वा शाके। द्वयोः किमपि लावण्यं (नमकीन इति पदवाच्ये) नास्ति—'अलवणः सूपः। अलवणं शाकम्'[8] इति।

स मुद्गद्विदलेन सह ओदनं भुङ्क्ते—'शालीन् भुङ्क्ते द्विदलैः'[9]।

१. महाभाष्ये—८।२।८३; २. तत्रैव—२।३।२८; ३. तत्रैव; ४. तत्रैव—२।३।३६। ५. तत्रैव—६।१।२; ६. तत्रैव—१।१।१; ७. तत्रैव—२।१।१; ८. तत्रैव। ९. तत्रैव।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta



देवदत्तेनाधुना पर्यन्तं दुग्धं न पीतम्, ( ओदनेन सह अथवा तस्यान्ते दुग्धपानस्य प्रथमभिलक्ष्य सङ्केतः ) 'अपीतं क्षीरं देवदत्तेन[1]।'

अतिथिं मांसेन सह ओदनं भोजयते। यथा दध्योदनस्य दुग्धोदनस्य, तथैव मांसौदनभक्षणस्य प्रथमभिलक्ष्य सङ्केतः—'मांसौदनिकोऽतिथिः[2]।'

एष्वतिथिषु मध्यादेकः परिचितोऽतिथिर्देवदत्तं पृच्छति—कथं देवदत्त! स्मर्यन्ते तानि दिनानि, यदा वयं काश्मीरे निवत्स्यामः, तत्र च ओदनानि भोक्ष्यामहे—'अभिजानासि देवदत्त! यत्काश्मीरेषु वत्स्यामः, यत् तत्रौदनानि भोक्ष्यामहे[3]।'

अन्यः परिचितः सखाऽस्मिन् प्रसङ्गे शीघ्रतया वदति—कथ्यतां देवदत्त! स्मरसि तद्दिवसं त्वम्, यदा वयं काश्मीरप्रदेशान् अगच्छाम, तत्र च सक्तून् अपिवाम—'अभिजानासि देवदत्त! कश्मीरान् अगच्छाम, तत्र सक्तून् अपिबाम[4]।'

(१०) अतिथयः परस्परमालपन्ति—

एकोऽतिथिः प्रवदति यत्—पश्य, स जनोऽतीव दुष्टः प्रतीयते। अति सम्भाव्यते यत् सः पलाण्डुना सह सुरां पिबति—'बृबलरूपोऽयम्, अप्ययं पलाण्डुना सुरां पिबेत्[5]।'

अन्योऽतिथिर्वार्तालापे वदति यत् पश्य, स मनुष्यस्तु चौरः प्रतिभाति। स तु अक्ष्णोर्लग्नमञ्जनमपि हरेत्—'चोररूपोऽयम्। अप्ययमक्ष्णोः अञ्जनं हरेत्[6]।'

तृतीयोऽतिथिः कथयति—पश्य, स जनस्तु पूर्णरूपेण दस्युरेव प्रतिभाति। स तु पलायमानस्य जनस्य रक्तमेव पिबेत्—'दस्युरूपोऽयम्। अप्ययं धावतो लोहितं पिबेत्[7]।'

चतुर्थोऽतिथिर्वदति—यस्य गृहे दशपुरुषाधिकं कोऽपि शूद्रोऽनुचरो न भवेत्; स एव सोमपानं कर्तुं शक्नोति, अन्यः कोऽपि न—'दशपुरुषान्तिकं यस्य गृहे शूद्रा न विद्येरन्, स सोमं पिबेत्[8]।'

पञ्चमोऽतिथिः कथयति यत्—पाटलिपुत्रपर्यन्तं तु अतिवृष्टिरभूत्—'आ पाटलिपुत्रं वृष्टो देवः[9]।'

इयती वार्ता जाता, अनन्तरमतिथिभ्यो दक्षिणायां गावः, मुद्राश्च दीयन्ते, ते च स्वगृहं प्रति निवर्त्तयन्ति। दक्षिणायां देवदत्ताय गौर्देया, यज्ञदत्त-विष्णुमित्राभ्यामपि गौर्दातव्या। ( एतानि त्रीणि मित्राणि अस्मिन् आमन्त्रणव्यापारे अतिथिरूपेण आतिथेयस्य गृहे अगच्छन्, य एभ्यो दक्षिणानिमित्तं गोप्रदानायादेशः स्वकर्मचारिणे ददाति ) —'देवदत्ताय गौर्दीयताम्, यज्ञदत्ताय विष्णुमित्राय[10]।'

१. महाभाष्ये; २. तत्रैव; ३. तत्रैव—१।१।४४; ४. तत्रैव—३।२।११४।
५. तत्रैव—५।३।६६; ६. तत्रैव—५।३।६६; ७. तत्रैव।
८. तत्रैव; ९ तत्रैव; १०. तत्रैव—१।३।११।



पथि निवर्तमान एकोऽतिथिर्दक्षिणाप्राप्तं रूप्यकं मुद्रापरीक्षकं दर्शयति। सः परीक्षको रूप्यकस्य परीक्षां करोति, यत्-तत् शुद्धधातुजं वर्तते न वा—'दर्शयति रूपतकं कार्षापणम्। पश्यति रूपतकं कार्षापणम्'[1]।

(११) देवदत्तस्य गृहे मित्राणामामन्त्रणम्—

कश्चिज्जनो मित्राणि निमन्त्रयति—भगवन् स्वगृहे देवदत्तो भवन्तं भोजनार्थम् आमन्त्रयते—'देवदत्तो भगवन्तम् आमन्त्रयते। देवदत्तशालायां ब्राह्मणा आनीयन्ताम्[2]।'

मित्राणि तत्र गत्वा पृच्छन्ति उस्थितजनान्—अस्मिन् समये देवदत्तः किं करोति? 'किं देवदत्तः करोति? उत्तरयति यत्—'देवदत्तो भोजनं पचति[1]।'

देवदत्तस्य मित्रं यज्ञदत्तो भोजनस्य व्यवस्थां करोति। समागतानि मित्राणि ओदनेन मृत्तिकानिर्मितेन शरावेण पत्रावलिनिर्मितेन च भोजनस्य प्रशस्तां व्यवस्थां यज्ञदत्तः करोति—'देवदत्तस्य समांशं शरावैः ओदनेन च यज्ञदत्तः प्रतिबध्नाति[4]।'

समाप्ते गते भोज्यपदार्थे जना आह्वानपूर्वकमुच्चैः कथयन्ति, देवदत्त! अपि ओदनमानय। यज्ञदत्तस्तान् भोजयिष्यते—'आहर देवदत्त शालीन्। यज्ञदत्त एनान् भोक्ष्यते[5]।'

(१२) देवदत्तस्य निधनम्—

देवदत्तस्य निधनमतिदुःखदं भवति। केनापि दुष्टेन तस्य हत्या विहिता। स दुष्टो घातकः रक्षिपुरुषेण गृहीतः। अधुना समस्या वर्तते—किं कुर्यात् तस्य वराकस्य? तस्मै यदि प्राणदण्डं दीयते, हन्याद्वा, तदापि किं देवदत्तः पुनः जीविष्यति? न हि, न हि—'न हि देवदत्तस्य हन्तरि हते देवदत्तस्य प्रादुर्भावो भवति[6]।'

देवदत्तस्य कृतायां हत्यायां यज्ञदत्तस्य हृदयं विदीर्णं भवति। फलतो यत्कार्यं द्वाभ्यां मित्राभ्यां करणीयमासीत्; परञ्च देवदत्ते मृते यज्ञदत्तोऽपि तत्कार्यं न सम्पादयिष्यति—'देवदत्त-यज्ञदत्ताभ्याम् इदं कर्म कर्तव्यम्। देवदत्तापाये यज्ञदत्तोऽपि न करोति[7]।'

महाभाष्ये सामाजिकदशाविमर्शः—

महाभाष्ये पतञ्जलिना चित्रितं देवदत्तस्य जीवनवृत्तमिदमस्ति। अस्य परीक्षणेन तद्युगे वर्तमानस्य लोकव्यवहारस्य, आचारविचारस्य, परिधानस्य, वेषविन्यासस्य, भोजनाच्छादनयोश्च स्वरूपपरिचय उपलब्धो भवति। महाभाष्ये वर्णिता भौगोलिकी

१. महाभाष्ये—१।४।५२; २. तत्रैव—१।४।५१; ३. तत्रैव—२।३।१।
४. तत्रैव; ५. तत्रैव—८।१।५१; ६. तत्रैव।
७. तत्रैव।

Center for Shaiva Studies, Pondicherry Collection

Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta



स्थितिः काशीतः पाटलिपुत्रपर्यन्तं विस्तृताऽऽसीत्। उक्तं क्षेत्रं 'काशीमण्डल' इति नाम्ना वयं सङ्कीर्तयिष्यामः। अद्यत्वे सामान्यतयाऽयं भूभागः 'भोजपुर-मण्डल' इति नाम्ना प्रसिद्धिं गतः। इयमतिमहत्त्वपूर्णा वार्ता यद् विक्रमात् पूर्वस्येयं जीवनपरम्परा अद्य सहस्रद्वयवर्षादधिके व्यतीतेऽपि अस्मिन् प्रदेशे यथावज्जागरूका वर्तते।

अद्याप्यस्य प्रदेशस्य निवासी देवदिन्नस्य शैल्यामेव स्ववालकस्य--'देवतादीन-रामदीन' इत्यादि नामकरणं करोति।

गुरोर्गृहे गत्वा पठनस्य परम्परा तथैवाद्यापि जागरूकाऽस्ति। कृषि-वाटिका-विन्यासस्य प्रचलनमद्यापि तथैवास्ति, यथा भगवता पतञ्जलिनोपरि चित्रितमस्ति। धान्यकृषिसम्पदोऽधिकता अद्यापि अस्मिन् प्रदेशे दृष्टिगोचरी भवति। हस्ते लावकं दात्रं नीत्वा जले उत्थितं धान्यं कृषक इयता वेगेन चङ्क्रमणं कुर्वन् लुनाति, तदा ज्ञायते यद् धान्यमनायासेनैव लूयमानं विद्यते। तस्मिन् समयेऽपि 'दात्रेण' धान्यं लूयते स्म। अस्यैव दात्रस्य वर्तमानं रूपं 'दांती' पदवाच्यमस्ति, यल्लावकाय प्रयुज्यते।

आश्चर्यमेतत्—यद् भोजनस्य परिपाटी यथावद् विद्यमाना अस्ति। अद्यापि यवनिर्मिता यवागू ( अथवा कृशरा ) अत्यानन्देन स्वादमादाय भक्ष्यते। अद्यापि भृष्टं तण्डुलं पिष्ट्वा तस्मिंश्च गुडं संयोज्य मोदकभक्षणस्य प्रथा विद्यमानाऽस्ति।

अस्य प्रदेशस्य सामान्यं भोजनं सक्तुरस्ति, यद् यवान् चणकांश्च भृष्ट्वा पिष्ट्वा च निर्मीयते। अस्य प्रदेशस्यायं भोज्यपदार्थो मध्ययुगीनानां कवीनां तीक्ष्णया दृष्ट्या कदापि तिरोहितो नाभूत्। द्वादशशताब्द्यां काश्यां प्रादुर्भूतेन महाकविना श्रीहर्षेण स्वीये नैषधीयचरिते महाकाव्ये सक्तुवर्णनं कुर्वन् लिखितमस्ति, यत् तत्सुगन्धिस्तथा आवर्जिका लावण्ययुक्ताऽऽसीत्, यत् सक्तुः स्वसुगन्धेन पथिकजनान् आकर्षयति स्म।

ब्रह्मभोजस्य परम्पराऽद्यापि तथैव विद्यमाना अस्ति, यद् ब्रह्मभोजस्य समय आमन्त्रितेषु जनेषु—विद्वत्कुले श्रेष्ठकुले चोत्पन्नान् ब्राह्मणान् प्रागेव भोजनं कारयते स्म। तथा च निम्नकोटिकान् ब्राह्मणान् महापात्रविशेषान्, स्वामी ( साँई ) प्रभृतीन् ब्राह्मणांश्च पश्चाद् भोजयन्तीति प्रथा विद्यते। महाभाष्ययुगीनकालवद् अद्यापि भोजनान्ते दधिभोजनस्य भोजयितुश्च प्रथा विद्यमाना वर्तते।

अत्रायं निष्कर्षोऽस्ति यद् महाभाष्ये वर्णितस्य भोजपुरी-देवदत्तस्य जीवनवृत्तम् इयन्महत्त्वपूर्णं हृदयावर्जकञ्चास्ति, यत् तं पठित्वा वयं द्वाविंशतिशतवर्षपूर्वस्य काशी-मण्डलस्य जनजीवनस्य मार्मिकं मनोरमं स्फुरणशीलञ्च चित्रणं प्राप्तुं शक्नुमः।

एतद् नितान्तं प्रामाणिकं समग्रं सुन्दरञ्चास्ति, यद् इदानीन्तनस्य समाजस्य अध्येतॄणां विदुषां दृष्टिरितोऽवश्यं पातनीया ( आकृष्टा स्यात् )।



तस्मिन् युगेऽपि एकं नगरं त्यक्त्वाऽन्यस्मिन् नगरे निवासस्य प्रथाऽऽसीत्। देवदत्तस्य मूलनिवासस्थानं स्रुघ्ननगरमासीत्, यस्मात् स्थानात् सः पाटलिपुत्रे वासं चकार। महाभारतकाले मथुरा-पाटलिपुत्रयोरिव स्रुघ्नस्य आर्थिकसम्पत्तेः समृद्धेश्च बहुश उल्लेखो मिलति। स्रुघ्नः थानेश्वरात् चत्वारिंशत् 'मील' ( विंशतिक्रोशात्मकम् ) अन्तराले लघुजनपद आसीत्। अयं पूर्वस्यां गंगातटपर्यन्तम्, उत्तरस्यां च उच्चपर्वत-श्रेणिपर्यन्तं विस्तृत आसीत्। यमुना एतस्य मध्ये ( मध्यतो वा ) प्रवहति स्म। अस्य मथुरानगर्या नैकटिकः सम्बन्ध आसीत्। अनयोर्द्वयोरुल्लेखोऽनेन प्रकारेण मिलति, येन एतयोर्दैनन्दिनो यातायातसम्बन्धस्तर्क्यते। स्रुघ्नाद् मथुरां यावद् अवक्रो मार्गो गच्छति स्म। स्रौघ्नप्रासादानां प्राकाराणाञ्च बहुश उल्लेखेन प्रतीयते यद् इदं महत्सम्पन्नं नगरमासीत्। स्रुघ्ननगरी-मेरठ-सहारनपुर-अम्बालामध्यादुत्तरे पञ्चापगमनमार्गे स्थिता आसीत्। स्रुघ्नमिदानीम् 'सुघ' इति नाम्ना कथयन्ति जनाः।

तस्मिन् युगे दघ्न आधिक्यमासीत्। महाभाष्यकारेण दघ्नः तिस्रः श्रेणयः प्रतिपादिताः—'मन्दः' ( किञ्चिदल्पजन्मयुतः ), 'उत्तरकः' ( पूर्णतया जन्मयुतः ), 'निलीनकश्च' ( प्रस्तुतानन्तरं किञ्चिद् हीनतां प्राप्तः )। ब्राह्मणभोजने दधिपर्यवेषणं क्रियते स्म। दधिपर्यवेषकं 'दधिसेचं' कथयन्ति स्म। दधि अत्यन्तं माङ्गलिकं स्वीक्रियते स्म। महाभाष्यस्य कथनमस्ति यद् दधिभोजनं कार्यसिद्ध्यै प्रायमिकं साधनमस्ति। 'दधिभोजनम् अर्थसिद्धेरादिः।'[1] इदं कथनमद्यापि काशीमण्डले आदरणीयत्वेन स्वीक्रियते, तथैतदनुसारेणास्य बहुलो व्यवहारः क्रियते।

सक्तुभ्यः ( =सातू ) प्रयोगस्याधिकताऽऽसीत्। अस्य व्यवहार इयानधिक आसीत् यद् आपणेषु विक्रयोऽपि भवति स्म। सामान्येन व्रीहीन् यवान् गोधूमांश्च भृष्ट्वा पिष्ट्वा च सक्तवो निष्पन्ना भवन्ति स्म। दृषदि पेषणात् ( अयं ) 'दार्षद' इति कथ्यते स्म। तिततउना ( चालन्या ) सञ्चाल्य स्वच्छः क्रियते स्म। विशेषेण सक्तवो यवैरेव निर्मीयन्ते स्म। सक्तवः पेया एवासन्; परञ्च दघ्ना संमेल्यापि सक्तून् भक्षणस्य प्रथाऽऽसीत्। फलतः 'उदसक्तुः' (उदकसक्तुः) तथा 'दधिसक्तुः' द्वयोः शब्दयोः प्रयोगो महाभाष्ये प्राप्येते। इयं प्रथाऽद्यापि भोजपुरप्रदेशे तथैव विद्यमानाऽस्ति।

वैदिककालेऽपि सक्तुपानस्य प्रथा प्रचलिताऽऽसीत्। दुग्धेन सह खाद्याः 'मन्थः' कथ्यते। सक्तुभोजनस्य प्रकारत्रयमासीत्—मधुमन्थः सक्तवः=मधुना संश्लेष्य, दधिमन्थः=दघ्ना संमेल्य, उदमन्थः=जलेन संयोज्य सक्तवो भक्ष्यते स्म[2] इति शम्।

१. महाभाष्ये—६।४।१६१; २. लाट्यायनसूत्रभाष्ये—१।२।७।८।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

Center for Shaiva Studies, Pondicherry Collection